# Shodha Upanishad

# ષોઢોપનિષત્

## Document Information

Text title : ShoDhopaniShat

File name : ShoDhopaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# ષોઢોપનિષત્

અથાહ વૈ શ્મ શવઃ શાનં શયનં શવાનાં શયનં શ્મશાનં
તદધિષ્ઠાનો મહાકાલસ્તત્પર્યઙ્કુસમાસીનાં વિશ્વવ્યાપકરૂપિણીં
કાલીં કાલાદિસન્ત્રાસાત્ કાલીં ચતુર્યુગાધિષ્ઠાત્રીં સ્વસ્મિન્ ભાવ્ય
ષોઢાં ન્યસેત્ । સ્થાનશુદ્ધિન્યાસં વિધાય ષોઢાં ન્યસેત્ । અથ
ષોઢાન્યાસી ષટ્કાલિત્વં ગચ્છતિ । સેયં ષટ્કલા પરા પરાત્પરા
પરાત્પરાતીતા ચિત્પરા ચિત્પરાત્પરા ચિત્પરાત્પરાતીતા । ષણ્ણાં યોગે
ષોઢા ભવેત્ । વૈષ્ણવકલાયુક્તાં માતૃકાયુક્તાં વૈષ્ણવીં ન્યસેદિતિ
પ્રથમઃ । સ પરારૂપો ભવેત્ । સ ભૂમિં જયતિ । સ શક્તિરૂપો
ભવેત્ । અથ વૈ કામકલાપુટિતાં શ્રીકલાં શ્રીકલાપુટિતાં કામકલાં
લિપિસ્થાને ન્યસેત્ । દ્વિતીયારૂપો ભવેત્ । સોઽમૃતત્વં ગચ્છતિ ।
સ જલં તરતીતિ યજ્ઞે ગીર્ણં ભવતિ । આદિકલાપુટિતાં શ્રીકલાં
શ્રીકલાપુટિતામાદિકલાં માતૃસ્થાને ન્યસેત્ । સ સિદ્ધીશ્વરો ભવેત્ ।
સ વહ્નિં જયતિ । દિવારાત્રિવ્યાપી ભવેત્ । કૂર્ચં ચન્દ્રં કૂર્ચં
ચન્દ્રમન્તર્દૃષ્ટિમદ્દીપનમન્ત્રં રાજ્ઞીપુટિતમેતેન પુટિતાં રાજ્ઞીં
ન્યસેત્ । સ ખેચરો ભવેત્ । સ વાયુપુરગામી ભવેત્ । સ કલાવાન્ ભવેત્ ।
ચતુર્થીરૂપો ભવેત્ । અનુલોમવિલોમેન મૂલમન્ત્રં કેવલં ન્યસેત્ ।
વિદ્યાન્યાસરૂપો ભવેત્ । સર્વં જયતિ । સ પઞ્ચમીરૂપો ભવેત્ ।
સ ચાકાશં જયતિ । અષ્ટોત્તરશતાનુલોમવિલોમાકૃતિક્રમેણ દેવતાં
વ્યાપયેત્ । સ ધ્વનિરૂપો ભવેત્ । સર્વં જયતિ । સર્વં જરતિ ।
મહાપાતકોપપાતકાનિ તરતિ । વયઃસ્થૈર્યકરો ભવેત્ । અષ્ટસિદ્ધિદાતા
ભવેત્ । તદ્દર્શનેન દેવત્વં ભવેત્ । ષષ્ઠીકલાવાન્ ભવેત્ ।
વિશ્વરૂપો ભવેત્ । યં પશ્યતિ તં શિવં કુરુતે । નમસ્કારાન્મૂર્તિસ્ફોટો
ભવેત્ । સ ગારૂપનાશકો ભવેત્ । સ મહેન્દ્રજાલદર્શકો ભવેત્ ।
તદ્દર્શનાત્ સિદ્ધીશ્વરો ભવેત્ । પુટિતિ છિન્નાકલ્પામુગ્રાયામઙ્ગષોઢાં
ન્યસેત્ । તત્સ્પર્શાદષ્ટલોહસ્પર્શો ભવેત્ । શક્તિકુણ્ડે જિહ્વાં નાડીં

વા ન્યસ્ય યો જપેત્ સ કાલીરૂપો ભવેત્ । ઇતિ શિવમ્ ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકાણ્ડે ષોઢોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Shodha Upanishad*
pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*